आह्निक प्रयोग

संस्कृत

क्र. नं. ५० उत्सर्जन

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

✓ 3747

(1)

॥अथउत्सर्जनप्रारंभः॥ ७॥

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(2)

॥श्रीगणेशायनमः॥अथउत्सर्जनोपाकर्मप्रयोगः॥श्रीमन्महाग
णाधिपतयेनमः॥निर्विघ्नमस्तु॥येभ्योमाता०॥१॥येवापित्रेवि०॥
२॥स्कसुरवश्चैकदंतश्च०ब्रह्मेशानजनार्दनाः॥१२॥श्रीलक्ष्मीना
रायणा०॥१२॥विष्णोर्विष्णुः श्रीम० ममआत्मनाश्रुतिस्मृतिपुराणो
क्तफलप्राप्त्यर्थं ममाध्यायानां चाधीतानां छंदआदीनां यातयामता
निरासेनाप्यायनद्वाराश्रीपरमेश्वरप्रीत्यर्थं एभिर्ब्राह्मणैः सहउत्स
र्जनाख्यं कर्म करिष्ये॥तत्रादौ निर्विघ्नतासिध्यर्थं महागणपति 1
पूजनं च करिष्ये॥गणानांत्वागत्समदोगणाधिपतिर्जगती॥ग

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

2A)

णपत्यावाहने विनियोगः ॥ ॐ गणानां त्वा गणपतिं हवामहे कवीं
कवीनामुपमश्रवस्तमं ॥ ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृ
ण्वंनूतिभिः सीद सादनं ॥ भूर्भुवः स्वः महागणपतये नमः ॥ आ
वाहनं समर्पयामि ॥ ध्यानं आसनं पाद्यं अर्घ्यं आचमनीयं ॥
स्नानं आचमनीयं वस्त्रं आचमनीयं यज्ञोपवीतं आचमनीयं ॥
गंधं पुष्पं अक्षतां हरिद्रां कुंकुमं धूपं नैवेद्यं आचमनीयं ॥ मुखं
वासनार्थे पूगीफलतांबूलं दक्षिणां ॥ ॐ निषुसीद गणपते ग
णेषु त्वामाहुर्विप्रतमं कवीनां ॥ न ऋते त्वत्क्रियते किंचना

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(3)

उत्स० रेमहामर्कं मेघवं चित्रमर्चं॥ मंत्रपुष्पं॥ नमस्करोमि॥ वक्रतुंड श्री०
२ महा० सर्वदा॥ अनयापूजानिर्विघ्नहरतामहागणपतिः प्रीयं
तां॥ अद्यपूर्वो० एभिर्ब्राह्मणैः सह उत्सर्जनांगत्वेन पंचगव्य
सम्मिलनं करिष्ये॥ गायत्र्यागोमूत्रं॥ गंधद्वारामिति गोमयं॥
आप्यायस्वेतिक्षीरं॥ दधिक्राव्ण इति दधि॥ शुक्रमसिज्योतिर
सिद्याज्यं॥ देवस्यत्वेति कुशोदकं॥ प्रणवेनालोड्य॥ अद्यपूर्वो०
एभिर्ब्राह्मणैः सह उत्सर्जनांगत्वेन पंचगव्यप्राशनमहं करिष्ये॥
सर्वेषां दत्वा॥ यत्वगस्तिगतं पापं देहे तिष्ठति मामके॥ प्राशनात् २
पंचगव्यस्य दहत्वग्निरिवेंधनं॥ ॐ प्राश्य आचम्य॥ अद्यपू०

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(3A)

एभिर्ब्राह्मणैः सह उत्सर्जनांगत्वेन स्थंडिलोल्लेखनाद्याग्नि
प्रतिष्ठापनं च करिष्ये॥ स्थंडिलं॥ तद्गोमयेन प्रदक्षिणमुपलि
प्य दक्षिणोत्तरौ उदीच्यां द्वे प्राच्यामपरामित्यंगुलानि त्यक्त्वा दक्षि
णोपक्रमामुदकसंस्थां प्रागायताः प्रादेशसंमितास्तिस्र इ
ति षट् उल्लेखायाज्ञिय शकलमूलेन दक्षिणहस्तेनोल्लिख्योल्ले
खास्तूतच्छकलमुदग्रं निधाय स्थंडिलमद्भिरभ्युक्ष्य शा
कलमाग्नेयां निरस्य पाणिं प्रक्षाल्य वाग्यतो भवेत्॥ ऋक्शाद
मूना आत्रेयो वसुश्रुतो ग्निस्त्रिष्टुप्॥ एह्यग्ने राहुगणो गो
तमो ग्निस्त्रिष्टुप्॥ अग्न्यावाहने विनियोगः॥ ॐ ऋक्शाद

(५)

उ० मूना अतिथिर्दुरोण इमन्नो यज्ञसुपयाहि विद्वान् ॥ विश्वा अग्ने अ प्र०
३ भियुजो विहत्या शत्रुयता माभरा भोजनानि ॥ एह्यग्न इह होता निषी
दादब्धः सुपुरएता भवा नः ॥ अवतां त्वा रोदसी विश्वमिन्वे यजा म
हे सौमनसाय देवान् ॥ इत्यक्षतैः गंधाद्य आच्छादनं हूरिकृत्य आ
दनं हूरिकृत्य समस्तव्याहृतीनां परमेष्ठी प्रजापतिः प्रजापतिर्बृह
ती अग्निप्रतिष्ठापने विनि० ॥ ॐ भूर्भुवःस्वरोम् बलवर्द्धननामा
नमग्निं प्रतिष्ठाप्य ॥ प्रोक्षितेंधनानि निक्षिप्य ॥ वेणुध मन्याप्रबो
ध्यध्यायेद्देवं ॥ चत्वारिशृंगेति गोतमो वामदेवोग्निस्त्रिष्टुप् ॥ ३

" Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

(५A)

अग्निमूर्तिध्याने विनियोगः ॥ ॐ चत्वारिशृंगा त्रयो अस्य पा
दा द्वे शीर्षे सप्त हस्तासो अस्य ॥ त्रिधा बद्धो वृषभो रोरवीति म
हो देवो मर्त्यां आविवेश ॥ सप्तहस्तः श्चतुर्भृंगः सप्तजिह्वो द्वि
शीर्षकः ॥ त्रिपात्प्रसन्नवदनः सुखासीनः शुचिस्मितः ॥ स्वाहां
तु दक्षिणे पार्श्वे देवीं वामे स्वधां तथा ॥ बिभ्रद्दक्षिणहस्तैस्तु श
क्तिमन्नं स्रुचं स्रुवं ॥ तोमरं व्यजनं वामे घृतपात्रं च धारयन् ॥
मेषारूढो जटाबद्धो गौरवर्णो महोजसः ॥ धूम्रध्वजो लोहि
ताक्षः सप्तार्चिः सर्वकामदः ॥ आत्माभिमुखमासीन एवं रूपो

" Joint project of Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai. "

उ० हुताशनः ॥एषहिदेवः प्रदिशोनुसर्वाः पूर्वोहिजातः सउगर्भेअंतः प्र०
॥ सविजायमानः सजनिष्यमाणः प्रत्यङ्मुखास्तिष्ठतिविश्वतोमुखः ॥
४ अग्नयेवैश्वानरशांडिल्यगोत्रमेषध्वजप्राङ्मुखममसन्मुखोवरदो
क्रियमा भव॥अद्यपू०मयाँणेउत्सर्जेहोमेदेवतापरिग्रहार्थमन्वाधानंकु न
रिष्ये॥अस्मिन्नन्वाहितेग्नौजातवेदसमग्निमिध्मेन प्रजापतिं ॥
प्रजापतिंचाघारदेवतेआज्येन अग्नीषोमौचक्षुषीआज्येन
अत्रप्रधानं॥सावित्रीं॥ब्रह्माणं॥श्रद्धांमेधां॥प्रज्ञां॥धारणां॥
सदसस्पतीं॥अनुमतीं॥छंदास्यृषीन्॥एताः प्रधानदेव ४
ताः आज्येन॥पुनरत्रप्रधानं॥अग्निअत्रपणसूर्यं॥अग्निं॥

Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai — Joint project

(5A)

द्राकुंतं ॥ अग्निं ॥ मित्रावरुणौ ॥ अग्निं ॥ आपः ॥ अग्निं ॥ मरुतः
अग्निं ॥ विश्वान्देवान् ॥ अग्निं ॥ इंद्रासोमौ ॥ इंद्रं ॥ अग्निमरुतः ॥
पवमानसोमं ॥ सोमं ॥ अग्निं संज्ञानं ॥ एताः प्रधानदेवताः गृहसि
द्धान्नचरुद्रव्येण ॥ शेषेण स्विष्टकृतमग्निमिध्मसंनहनेन रुद्रम
यासमग्निं देवान् ॥ विस्फं अग्निं वायुं सूर्यं प्रजापतिं च एताः प्रा
यश्चित्तदेवताः आज्येन द्ता ता ताशेषनिबर्हणार्थं त्रिवारमग्निम
रुतश्चाज्येन विश्वान्देवान्संस्रावेण अंगदेवताः प्रधानदेवताः
सर्वाः सन्निहिताः संतु एवं सांगोपांगेन कर्मणा सद्यो यक्ष्ये ॥

(6)

उ० समस्तव्याहृतीनां परमेष्ठिः प्रजापतिः प्रजापतिर्बृहती ॥ अन्वा प्र०
५ धानसमिद्धोमेविनियोगः ॥ ॐ भूर्भुवःस्वस्वाहा ॥ प्रजापतय
इदं ॥ अन्वाधानम् ॥ इध्माबर्हिषोश्च संनहनं ॥ अग्निं परिसमूह
नं ॥ परिस्तरणं ॥ तत्र प्राच्यां प्रतीच्यां चोदगग्रा दर्भाः अवाच्या
मुदीच्यां च प्रागग्राः ॥ पूर्वपश्चात्परिस्तरणमूलयोरुपरि दक्षिणो
त्तरपरिस्तरणं तु तदग्रयोरधस्तात् ॥ ते च दर्भा आनियतसं
ख्याः एके कस्यां दिशि चत्वारि इत्येवं षोडश वा ॥ ततोग्नेर्दक्षिणतो ५
ब्रह्मासनार्थं उत्तरतश्च पात्रासादनार्थं कांश्चित्प्रागग्रां दर्भांस्तृणी

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(6A)

यात्॥ पर्युक्षणं॥ अग्नेरीशानीनास्त्रिरंभसापरिषिच्य॥ उत्तरा
स्तीर्णेषु दर्भेषु दक्षिणसव्यपाणिभ्यां क्रमेण॥ चरुस्थालीप्रोक्षण्यौ
दर्वि स्रुवौ प्रणीता आज्यपात्रे इध्मा बर्हिषि॥ ततः प्रोक्षणी प्रोक्ष्य
प्रोक्षणीपात्रमुत्तानं कृत्वा तत्रानंतरगर्भितसाग्रसमस्थूल प्रादे
शमात्रकुशद्वयरूपे पवित्रे निधाय॥ शुद्धाभिरद्भिस्तत्पात्रं पूरयि
त्वा गंधपुष्पाक्षतादि क्षिप्त्वा हस्तयोरंगुष्ठोपकनिष्ठिकाभ्यां मुद
गग्रे एध्य कृपवित्रे धृत्वा॥ औपस्त्रिरुत्पूय पात्राण्युत्तानानि
कृत्वा इध्मं च विस्रस्य सर्वाणि पात्राणि त्रिः प्रोक्षयेत्॥ ता आपः

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan Mumbai.

(७)

उ० किंचित्कमंडलौ प्रक्षिपेदित्येके ततः प्रणीतापात्रमग्नेः प्रत्यङ् निधाय त प्र०
५ त्र प्रागग्रे पवित्रे निधाय ॥ उत्पूताभिरद्भिः स्तत्पात्रं पूरयित्वा गंधपु
ष्पाक्षतान्निक्षिप्य मुखसमं धृत्वा ॥ निरस्तः परावसुः ॥ अपउप
स्यइप ॥ इदमहमर्वावसोः सदने सीदामीत्युक्त्वा ॥ ॐ ब्रह्मन्नः प्रवे
ष्यामि ॥ बृहस्पतिर्ब्रह्मा ब्रह्मसदन आशिष्यते बृहस्पते यज्ञं गोपा
य स यज्ञं पाहि स यज्ञपतिं पाहि स मां पाहि ॥ ॐ भूर्भुवः स्वर्बृहस्प
ति प्रसूतः ॥ ॐ प्रणय ॥ अग्नेरुत्तरतो दर्भेषु निधाय पवित्रे गृही
त्वा अन्यैर्दर्भैराच्छादयेत् ॥ ते पवित्रे आज्यपात्रे निधाय ॥ तत्पात्रं ५
पुरतः संस्थाप्य तस्मिन्नाज्यमासिच्य ॥ अग्नेरुत्तरतः स्थितानं

Joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai.

(२-A)

गारानुभस्मना सहाग्नेरुदक्परिस्तरणाद्बहिर्निरस्य तेष्वाज्यपा
त्रमधिश्रित्य ॥ ज्वलतादर्भोल्मुकेनावज्वाल्य ॥ अंगुष्ठपर्वमात्रं
प्रक्षालितं दर्भाग्रद्वयमाज्ये प्रक्षिप्य ॥ पुनर्ज्वलता तेनैव दर्भोल्मु
केन चरुणा सहाज्यं त्रिः पर्यग्निकरणं कृत्वा ॥ तदुल्मुकं निरस्य
आंगारान्प्रोप्रत्येस्य आपउपस्पृश्य ॥ तत्र रूढमेवाज्यं ॥ सवितु
ष्टाहिरण्यस्तूपः सविता पुरउष्णिक् ॥ आज्यस्योत्पवने विनियो
गः ॥ ॐ सवितुष्ट्वा प्रसव उत्पुनाम्यच्छिद्रेण पवित्रेण वसोः सूर्य
स्य रश्मिभिः ॥ इति प्राग्उत्पुनाति सकृन्मंत्रेण द्विस्तूष्णीं प्रोक्ष्य पु
वित्रकं ॥ स्कंदाय स्वाहा स्कंदायेदं न मम ॥ ततः आत्मनोग्रतो

Joint project of the Rajwade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(8)

उ० भूमिं प्रोक्ष्य ।। तत्रबर्हिः सन्नहनीं रज्जुमुदगग्रां प्रसार्य ।। तस्यां बर्हि प्र०
७ प्राग्रगमुदगपवर्गमविरलमास्तीर्य ।। तेष्वाज्यपात्रं निधाय स्रु
वादि संमार्जयेत् ।। दक्षिणहस्तेन स्रुक्स्रुवौ गृहीत्वा सव्येन
कांश्चिद्दर्भानादाय ।। सहे वाग्नौ प्रताप्य स्रुचिं निधाय ।। स्रुव
स्य बिलमग्रे स्तु पृष्ठमभ्यात्तु मग्रतः ।। आरभ्य पृष्ठतो यावदु
परिष्टाद्बिलं भवेत् ।। प्रोक्ष्य ।। प्रताप्य घृतादुत्तरतस्थापयै
त् ।। तथैव स्रुचिं संमार्जयेत् ।। कुशानां मूलतो दंडमेकैकं त्रि ७
मृज्येत वै ।। प्रोक्ष्य प्रताप्य ।। आज्यादुत्तरतस्थापयेत् ।। दर्भान
द्भिः प्रक्षाल्य इत्वा अग्नौ प्रहरेत् ।। ततः स्रुवं चरुमभिघार्य ।।

Joint project of the Rajawade Sanshodhak Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(8A)

उदगुद्वास्य ॥ अग्न्याज्ययोर्मध्येन नीत्वा ॥ आज्यं दक्षिणतो
बर्हिषि सांतरमासाद्य ॥ पुनरप्यभिघार्य ॥ हविः पृथक्करणा
य स्रुवं पात्रांतरं समुद्धृत्य ॥ अग्न्यर्चनं ॥ विश्वानि न इत्यनयो
र्वसुश्रुतो ऽग्निस्त्रिष्टुप् ॥ द्वाभ्यामर्चने अंत्यकपस्थाने विनि
योगः ॥ ॐ विश्वानि नो दुर्गहा जातवेदः ॥ ॐ सिंधुं न ना
वा दुरितातिपर्षि ॥ ॐ अग्ने अत्रिवन्नमसा गृणानः ॥ ॐ
अस्माकं बोध्यविता तनूनां ॥ ॐ यस्त्वा हृदा कीरिणा मन्यमा
नः ॥ ॐ अमर्त्यं मर्त्यो जोहवीमि ॥ ॐ जातवेदो यशो अस्मा
सु धेहि ॥ ॐ प्रजाभिरग्ने अमृतत्वमश्यां ॥ ८ ॥ ॐ यस्मै त्वं

(9)

उ० स्रुकृतेजातवेद उल्लोकमग्ने कृणवस्योनं ॥ अश्विनं सपुत्रिणं प्र०
८ वीरवंतं गोमंतं रयिन्नेशाते स्वस्ति ॥ आत्मानं चालंकृत्य ॥ हस्तं प्र
क्षाल्य ॥ इध्मबंधनरज्जुमिध्मस्थाने निधाय पाणिनेध्ममादा
य ॥ मूलमध्याग्रेषु स्रुवेण त्रिरभिघार्य ॥ मूलमध्ययोर्मध्यभागे
गृहीत्वा ॥ अयंते वामदेवो जातवेदा त्रिष्टुप् ॥ इध्माहवने वि
नियोगः ॥ ॐ अयंत इध्म आत्मा जातवेदस्तेनेध्यस्व वर्द्धस्व चे
द्ध वर्धय चास्मान् प्रजया पशुभिर्ब्रह्मवर्चसेनान्नाद्येन समेधय
स्वाहा ॥ जातवेदसेऽग्नय इदं ॥ ततः वायव्यकोणमारभ्य आ ८
ग्नेयीकोणपर्यंतं प्रजापतये स्वाहा ॥ प्रजापतय इदं ॥ ततः नैर्ऋ

(9A)

त्य कोणमारभ्यईशानीपर्यंतंप्रजापतये स्वाहा ॥ प्रजापतय इदं ॥ उ
त्तरमाग्नेयं अग्नये स्वाहा ॥ अग्नय इदं ॥ दक्षिणं सोमं ॥ सोमाय स्वा
हा ॥ सोमाय इदं ॥ प्रधाना आहुतीर्जुहुयात् ॥ ॐ सावित्र्यै स्वाहा ॥
सावित्र्या इदं ॥ ॐ ब्रह्मणे स्वाहा ॥ ब्रह्मण इदं ॥ ॐ श्रद्धायै स्वाहा ॥
श्रद्धाया इदं ॥ ॐ मेधायै स्वाहा ॥ मेधाया इदं ॥ ॐ प्रज्ञायै स्वाहा ॥
प्रज्ञाया इदं ॥ ॐ धारणायै स्वाहा ॥ धारणाया इदं ॥ ॐ सदसस्प
तये स्वाहा ॥ सदसस्पतय इदं ॥ ॐ अनुमतये स्वाहा ॥ अनु० इ
दं ॥ ॐ छंदोभ्य ऋषिभ्य स्वाहा ॥ छंदोभ्य ऋषिभ्य इदं ॥ ८ ॥ पंचा
वत्तितु मंत्रं पठेत् ॥ ॐ प्रसूतो भक्षमकरं चरावपिस्तोमंचेमं

(10)

उत्सं० प्रथमंःसूरिरुन्मजे ॥ स्कृतेसातेनयद्यागमंवांप्रति । विश्वामित्रजमदग्नी प्र०
१ दमे ॥ तृतीयंआवदानंग्राह्य ॥ आवदानमंत्रैः ॥ अग्निमिळेमधुछंदाग्नि
र्गायत्री ॥ उत्सर्जनप्रधानगृह्य सिधान्नचरुहोमे विनियोगः ॥ ॐ अग्नि
मिळेपुरोहितंयज्ञस्यदेवमृत्विजं ॥ होतारंरत्नधातमंस्वाहा ॥ अग्नय
इदं ॥ १ ॥ कुषुंभकस्तदगस्त्योस्तृणासूर्योनुष्टुप् ॥ उत्सर्जनेप्रधानगृह० ॥
ॐ कुषुंभकस्तदब्रवीद्गिरेः प्रवर्तमानकः ॥ वृश्चिकस्यारसंविषमं
रसंवृश्चिकतेविषंस्वाहा ॥ अस्तृणसूर्यायइदं ॥ २ ॥ त्वमग्नेगृत्समदो
ग्निर्जगती ॥ उत्सं० ॥ ॐ त्वमग्नेद्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्व १
मश्मनस्परि ॥ त्वंवनेभ्यःस्त्वमोषधीभ्यःस्त्वंनृणांनृपतेजायसेशु

A joint project of the Rajawade Sanshodhan Mandal, Dhule and the Yashwantrao Chavan Pratishthan, Mumbai

(10A)

त्रिः स्वाहा ॥ अग्नय इदं ॥ ३ ॥ आवदन् गृत्समदः शकुनो जगती ॥
उ० ॐ ॥ आवदंस्त्वं शकुने भद्रमावद तूष्णीमासीनः सुमतिं चिकि
द्धि नः ॥ यदुत्पतन्वदसि कर्करिर्यथा बृहद्वदेम विदथे सुवीराः स्वाहा
॥ शकुनायेदं ॥ ४ ॥ सोमस्य मा गाथिनो विश्वामित्रोग्निस्त्रिष्टुप् ॥
उत्स० ॥ ॐ सोमस्य मा तवसं वक्ष्यग्ने वह्निं चकर्थ विदथे यजध्यै ॥
देवाँ अच्छा दीद्यद्युंजे अद्रिं शमाये अग्ने तन्वं जुषस्व स्वाहा ॥ अग्न
य इदं ॥ ५ ॥ गृणाना भार्गवो जमदग्निर्मित्रावरुणौ गायत्री ॥ उत्स०
ॐ गृणाना जमदग्निना योनावृतस्य सीदतं ॥ पातं सोममृतावृधा
स्वाहा ॥ मित्रावरुणाभ्यामिदं ॥ ६ ॥ त्वां ह्यग्ने गोतमो वामदेवो ग्नि

Rajwade Sanshodhan Mandal, Dhule ... Pratishthan, Mumbai

## मूळ प्रत पाहण्यासाठी संपर्क

---


**इतिहासाचार्य वि.का. राजवाडे संशोधन मंडळ, धुळे**
राजवाडे पथ, गल्ली नं. १, धुळे-४२४००१ (महाराष्ट्र)
**दूरध्वनी क्रमांक** (०२५६२) २३३८४८
**Email ID** : rajwademandaldhule@gmail.com